# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – अक्टूबर, २०१९

कक्षा – आचार्यप्रथमवर्षम् (SEM-1) **प्रश्नपत्रम् – ४** गुणाः - ७०

विषयः – वेदः **कोड – CC-4.1.3** समयः – ८.०० तः ११.००

दिनाङ्कः – १२/१०/२०१९ सन्दर्भग्रन्थः –कात्यायनश्रौतसूत्रम्

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ अधोलिखितयोः सूत्रयोः कस्यचिद् एकस्य सूत्रस्य व्याख्यां यथाभाष्यं लिखत।** ०५

(१) वाऽवकीर्णिनो गर्दभेज्या।
(२) तेषां वाक्यं निराकाङ्क्षम्।

**प्रश्नः – २ एकस्योत्तरं यथाभाष्यं देयम्।** १०

(१) ऋत्विक्कर्माधिकार- विषये कात्यायनश्रौतसूत्राधारेण स्वकीयान् विचारान् उपस्थापयत।
(२) अधिकारनिरूपणप्रसङ्गं कात्यायनश्रौतसूत्रानुसारं विचार्यताम्।

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ३ अधोलिखितयोः सूत्रयोः कस्यचिद् एकस्य सूत्रस्य व्याख्यां यथाभाष्यं लिखत।** ०५

(१)मन्त्रचोदनयोर्मन्त्रबलं प्रयोगित्वात्।
(२)कर्मणामानुपूर्व्यं न युगपद्भावात्।

**प्रश्नः – ४ एकस्य निबन्धात्मकमुत्तरं यथाभाष्यं देयम्।** १०

(१) प्रधानकर्मसु अनुष्ठानक्रमनियमविषये यथा ज्ञानं लिखत।
(२) यूननिर्माणप्रकारं प्रतिपाद्य इध्मबर्हिषोः बन्धनप्रकारं लिखत।

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ५** **अधोलिखितयोः सूत्रयोः कस्यचिद् एकस्य सूत्रस्य व्याख्यां यथाभाष्यं लिखत।** ०५

(१) कर्मणां युगपद्भावस्तन्त्रम्।

(२) होत्राधानयोः।

**प्रश्नः – ६** **एकस्योत्तरं यथाभाष्यं देयम्।** १०

(१)कात्यायनश्रौतसूत्रस्य महत्त्वं वैशिष्ट्यं च प्रतिपादयत।

(२)ऋज्वादिगुणानामाधारे समुच्चयसन्दर्भे स्वविचारान् उपस्थापयत।

## चतुर्थान्वितिः (Unit-४)

**प्रश्नः – ७** **अधोलिखितयोः सूत्रयोः कस्यचिद् एकस्य सूत्रस्य व्याख्यां यथाभाष्यं लिखत।** ०५

(१) सर्वेषां वोभयमविधानात्।

(२) चर्माण्युत्तरलोमानि प्राग्ग्रीवाणि।

**प्रश्नः – ८** **एकस्योत्तरं देयम्।** १०

(१) स्विष्टकृदाहुतिविषये पठितग्रन्थाधारेण विचारमुपस्थापयत।

(२) दानवचनादिषु यजमानकर्तृत्वमुपकल्पयत।

**प्रश्नः – ९** **निम्नलिखितेषु केषाञ्चित् दश प्रश्नानाम् अतिलघूत्तरं लिखत।** १०

(१)'षण्ढ' इति शब्दस्य कोऽर्थः ?

(२)रथकारः जातिविशेषः त्रैवर्णिको वा ?

(३)के जुहोतयः ?

(४)श्रौतकर्म कुत्र सम्पादितं भवति ?

(५)यागस्य लक्षणं किम् ?

(६)ऋक्साममन्त्राणां पाठः कथं कर्तव्यः ?

(७) स्रुचः निर्माणं केन काष्ठेन भवति ?

(८) यज्ञादौ बर्हिशब्दः संस्कारवाचको जातिवाचको वा ?

(९) पशुमभिलषितयजमानस्य कृते वेदः कथं निर्मातव्यः ?

(१०) ‘स्त्री चाविशेषात्’ इति पदस्य कोऽर्थः ?

(११) प्राशित्रहरणस्याकृतिः कीदृशी ?

(१२) ज्योतिष्टोमयागे कति पशुयागाः विहिताः ?

(१३) द्रव्याणां संस्कारः कुत्र विधेयः ?

(१४) ‘गार्हपत्याहवनीयौ न व्यसेयात्’ इत्यस्य कोऽर्थः ?

(१५) कात्यायनश्रौतसूत्रस्य सम्बन्धः केन वेदेन सह वर्तते ?

***

# **Answer Key**

कक्षा – आचार्यप्रथमवर्षम् (SEM-1) **प्रश्नपत्रम् – ४** गुणाः - ७०

विषयः – वेदः **कोड – CC-4.1.3** समयः –

दिनाङ्कः – सन्दर्भग्रन्थः – कात्यायनश्रौतसूत्रम्

**प्रश्नः – ९**

(१) ‘षण्ढ’ इति शब्दस्य कोऽर्थः ? नपुंसकः

(२)रथकारः जातिविशेषः त्रैवर्णिको वा ? जातिविशेषः

(३)के जुहोतयः ? उपविष्टहोमा स्वाहाकार प्रदाना जुहोतयः

(४)श्रौतकर्म कुत्र सम्पादितं भवति ? वैतानिकेषु

(५)यागस्य लक्षणं किम् ? द्रव्यं देवता त्यागः

(६)ऋक्साममन्त्राणां पाठः कथं कर्तव्यः ? उच्चस्वरेण

(७) स्रुचः निर्माणं केन काष्ठेन भवति ? पलाशेन

(८) यज्ञादौ बर्हिःशब्दः संस्कारवाचको जातिवाचको वा ? जातिवाचकः

(९) पशुमभिलषितयजमानस्य कृते वेदः कथं निर्मातव्यः ? वत्सजानुसदृशः

(१०) ‘स्त्री चाविशेषात्’ इति पदस्य कोऽर्थः ? स्त्रीणामपि यज्ञकर्मणि अधिकारो विद्यते

(११) प्राशित्रहरणस्याकृतिः कीदृशी ? दर्पणसदृशम्

(१२) ज्योतिष्टोमयागे कति पशुयागाः विहिताः ? त्रयः

(१३) द्रव्याणां संस्कारः कुत्र विधेयः ? गार्हपत्ये

(१४) ‘गार्हपत्याहवनीयौ न व्यसेयात्’ इत्यस्य कोऽर्थः ? आहवनीयगार्हपत्ययोर्मध्ये व्यवधानं न कुर्यात् न गच्छेत्

(१५) कात्यायनश्रौतसूत्रस्य सम्बन्धः केन वेदेन सह वर्तते ? यजुर्वेदेन